শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৮৪


*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***


*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮৪

*সূর্যগ্রহণযাত্রাৱর্ণনম্*

ক্বচিদথ তপনোপরাগকালে
    পুরি নিদধত্ কৃতৱর্মকামসূনূ।
যদুকুলমহিলাৱৃতঃ সুতীর্থং
    সমুপগতোসি সমন্তপঞ্চকাখ্যম্॥ ১ ॥

বহুতরজনতাহিতায তত্র
    ত্ৱমপি পুনন্ ৱিনিমজ্য তীর্থতোযম্।
দ্ৱিজগণপরিমুক্তৱিত্তরাশিঃ
    সমমিলথাঃ কুরুপাণ্ডৱাদিমিত্রৈঃ॥ ২ ॥

তৱ খলু দযিতাজনৈঃ সমেতা
    দ্রুপদসুতা ত্ৱযি গাঢভক্তিভারা।
তদুদিতভৱদাহৃতিপ্রকারৈঃ
    অতিমুমুদে সমমন্যভামিনীভিঃ॥ ৩ ॥

তদনু চ ভগৱন্ নিরীক্ষ্য গোপা-
    নতিকুতুকাদুপগম্য মানযিত্ৱা।
চিরতরৱিরহাতুরাঙ্গরেখাঃ
    পশুপৱধূঃ সরসং ত্ৱমন্ৱযাসীঃ॥ ৪ ॥

সপদি চ ভৱদীক্ষণোতসৱেন
    প্রমুষিতমানহৃদাং নিতম্বিনীনাম্।
অতিরসপরিমুক্তকঞ্চুলীকে
    পরিচযহৃদ্যতরে কুচে ন্যলৈষীঃ॥ ৫ ॥

www.prapatti.com

রিপুজনকলহৈঃ পুনঃ পুনর্মে
    সমুপগতৈরিযতী ৱিলম্বনাভূত্।
ইতি কৃতপরিরম্ভণে ত্বযি দ্রা-
    গতিৱিৱশা খলু রাধিকা নিলিল্যে॥ ৬ ॥

অপগতৱিরহৱ্যথাস্তদা তা
    রহসি ৱিধায দদাথ তত্ত্ববোধম্।
পরমসুখচিদাত্মকোঽহমাত্মে-
    ত্যুদযতু ৱঃ স্ফুটমেৱ চেতসীতি॥ ৭ ॥

সুখরসপরিমিশ্রিতো ৱিযোগঃ
    কিমপি পুরাভৱদুদ্ধৱোপদেশৈঃ।
সমভৱদমুতঃ পরং তু তাসাং
    পরমসুখৈক্যমযী ভৱদ্বিচিন্তা॥ ৮ ॥

মুনিৱরনিৱহৈস্তৱাথ পিত্রা
    দুরিতশমায শুভানি পৃচ্ছ্যমানৈঃ।
ত্বযি সতি কিমিদং শুভান্তরৈরি-
    ত্যুরুহসিতৈরপি যাজিতস্তদাসৌ॥ ৯ ॥

সুমহতি যজনে ৱিতাযমানে
    প্রমুদিতমিত্রজনে সহৈৱ গোপাঃ।
যদুজনমহিতাস্ত্রিমাসমাত্রং
    ভৱদনুষঙ্গরসং পুরেৱ ভেজুঃ॥ ১০ ॥

ৱ্যপগমসমযে সমেত্য রাধাং
    দৃঢমুপগূহ্য নিরীক্ষ্য ৱীতখেদাম্।
প্রমুদিতহৃদযঃ পুরং প্রযাতঃ
    পৱনপুরেশ্বর পাহি মাং গদেভ্যঃ॥ ১১ ॥

**********


www.prapatti.com